संस्कृत-वार्ता:

दिनाङ्क: 31.05.2025

प्रात: 06.55

प्रधानमन्त्री/मध्य प्रदेश

प्रधानमन्त्री नरेन्द्र मोदी अद्य मध्य-प्रदेशस्य राजधानीं भोपालं प्रयास्यति। श्री मोदी भोपाले लोकमातु: देव्या: अहिल्या-बाई होल्करस्य: त्रिशततम्यां जयन्त्याम् लोकमातु देवी-अहिल्याबाई महिला सशक्तिकरण-महासम्मेलने भागं स्वीकरिष्यति। प्रधानमन्त्री भोपले कासाचित विकास-परियोजनानां लोकार्पणं शिलान्यासं च करिष्यति।

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् - आपरेशन सिन्दूरम आभियानं द्वारा भारतेन स्वदेशीयरक्षाक्षमता, मेक इन इण्डिया इत्यस्य शक्तिः च दर्शिता। प्रधानमन्त्री नरेन्द्रमोदी गतदिवसे उत्तरप्रदेशस्य कानपुरे 47, 500 पञ्चशतोत्तर- सप्त चत्वारिंशत्- सहस्रकोटिरूप्यकेभ्यः अधिकमूल्यानां पञ्चदश मेगाविकासपरियोजनानां उद्घाटनं शिलान्यासं च अकरोत्।

उत्तर प्रदेशस्य कानपुरनगरे गतदिवसे अपराह्णे प्रधानमन्त्री नरेन्द्रमोदी प्राय: सार्द्ध-सप्त-चत्वारिंशत्सहस्र-कोटिरूप्यकाणां पंचदश बृहद्विकासपरियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। स: चुन्नीगंज-नयागंजयो: मध्ये कानपुर-मेट्रो-रेलयानस्य नूतन-वीथ्या: अपि हरितध्वजप्रदर्शनपूर्वकं शुभारंभ कृतवान्।

एका सभा च सम्बोधयता प्रधानमन्त्रिणा उक्तं यत सम्पूर्ण: संसार नारीणां क्रोधं, पीडां च सिन्दूराभियान रूपेण दृष्टवान् बाइट-पीएम ऑन मेक इंन इंडिया-27 सेभारतेन पाकिस्तानस्य अनेकानि आतङ्ककेन्द्राणि पूर्णतया विनष्टीकृतानि।

बाइट-पीएम ऑन रूल्स-23 से प्रधानमन्त्री- बिहार ततः पूर्वं प्रधानमन्त्रिणा बिहारस्य रोहतासमण्डलस्य दुर्गाडीहग्रामे 48,500 पञ्चशतोत्तर अष्टचत्वारिंशत् सहस्रकोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनं शिलान्यासः च कृतः। मोदी अवदत् यत् बिहारे युगलचालकयुतम् प्रशासनं राज्यस्य सर्वतोमुखेन विकासाय निरन्तरं प्रयत्नं कुर्वत् अस्ति।

*******

जम्मू-कश्मीर

गृहमंत्री अमितशाह: जम्मू-कश्मीर ऑपरेशन-सिन्दूरस्य समये पाकिस्तानं प्रति कृतै: गोलिकाप्रहारै: प्रभावितेभ्य: जनेभ्य: विशेषोद्धार-सहाय्यं घोषितम्। पुंछ जनपदे असौ गोलिकाप्रहारेषु भारतीय-जानानां परिजनेभ्य: नियुक्ति-पत्राणि वितरितानि।

*******

रक्षामन्त्री/आतङ्कवाद:

रक्षामन्त्री राजनाथसिंहः अवदत् - भारतं आतङ्कवादं निवारयितुं किमपि क्रियान्वयनं कर्तुं न संकोचं न करिष्यति। आतङ्कवादं निवारयितुं भारतं किमपि कार्यं कर्तुं संकोचं न करिष्यति। रक्षामन्त्री राजनाथसिंहः पाकिस्तानाय संचेतनां प्रदत्तवान्। सः अवदत् यत्

पाकिस्तानेन स्वयमेव वर्धमानं: आतङ्कवाद: उद्धर्तव्यः। गोवानगरे सिंहमहोदयः अवदत् यत् भारतस्य नागरिकाणाम् आतङ्कवादात् रक्षणस्य अधिकाराय समग्रं विश्वं समर्थनं करोति। रक्षामन्त्री उक्तवान् यत् सिन्दूर-कार्यक्रमः केवलं सैन्यक्रिया एव न, अपितु आतङ्कवादस्य उपरि भारतस्य प्रत्यक्षतया आक्रमणम् एव ।

*******

जीडीपी

चतुर्विंशत्युत्तर द्विसहस्रात् पञ्चविंशत्युत्तरद्विसहस्र-वित्तवर्षस्य अन्तिमत्रिमासे वास्तविक सकल गृह उत्पादेषु चतुःदशांशोत्तर सप्त प्रतिशतस्य वृद्धिः अनुमीयते। देशस्य वास्तविक सकल गृह उत्पादेस्य वास्तविकजीडीपी- पञ्च दशांशोत्तर षट् प्रतिशतम् इति वित्तवर्षे अनुमानितम्। चतुर्विंशत्युत्तर द्विसहस्रात् पञ्चविंशत्युत्तरद्विसहस्र-वित्तवर्षस्य 2024-25 अन्तिमत्रिमासे वास्तविकजीडीपीवृद्धिः चतुरदशांशोत्तर 7 प्रतिशतस्य अनुमानम् अस्ति। वित्तमन्त्री निर्मला सीतारमणः उद्योगस्य निर्माणक्रियाकलापस्य च प्रशंसाम् अकरोत् यत् भारतस्य विकासः स्थापितव्यः।

*******

आईपीएल

आईपीएल-क्रिकेट्-क्रीडायां गुजरात-टाइटन्स्-क्लबदलस्य मुम्बई-इण्डियन्स्-क्लबदलस्य च मध्ये एलिमिनेटर्-क्रीडायां मुम्बई इण्डियन्स् दलं विजितम्।